বৈয়াকরণসিদ্ধান্ত-কৌমুদী

# অচ্‌সন্ধিপ্রকরণম্

(সূত্র—সূত্রচ্ছেদ-বৃত্তি-বঙ্গার্থ-সন্ধিসাধন-
বালমনোরমাটীকা-সংবলিতম্)

ব্যাকরণাচার্য্য
ডঃ শ্রীবিশ্বরঞ্জন পাণ্ডা
বেদ-ব্যাকরণতীর্থ
প্রাধ্যাপক
দি সংস্কৃত কলেজ্ এণ্ড্ ইউনিভার্সিটি
কলকাতা

সংস্কৃত বুক ডিপো
২৮/১, বিধান সরণী
কলকাতা-৭০০ ০০৬

ॐ नमः शिवाय

# ।। अथाच्सन्धि-प्रकरणम् ।।

४७। इको यणचि (६/१/७७)

इकः स्थाने यण् स्यादचि संहितायां विषये। 'सुधी उपास्यः' इति स्थिते। स्थानत आन्तर्यादीकारस्य यकारः। 'सुध् य् उपास्यः' इति जाते।

४८। अनचि च (८/४/४७)

अचः परस्य यरो द्वे वा स्तो न त्वचि। इति धकारस्य द्वित्वम्।

४९। स्थानिवदादेशोऽनल्विधौ (१/१/५६)

आदेशः स्थानिवत् स्यात्, न तु स्थान्यलाश्रयविधौ। अनेनेह यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्य 'अनचि' (सू. ४८) चेति द्वित्वनिषेधो न शंक्योऽनल्विधाविति तन्निषेधात्।।

५०। अचः परस्मिन् पूर्वविधौ। (१/१/५७)

अल्विध्यर्थमिदम्। परनिमित्तोऽजादेशः स्थानिवत् स्यात्,

# ওঁ নমঃ শিবায়

## ॥ অথাচ্‌সন্ধি-প্রকরণম্ ॥

৪৭। ইকো যণচি (৬/১/৭৭)

[ ইকঃ—৬/১, যণ্—১/১, অচি—৭/১ ]

দীক্ষিতঃ—ইকঃ স্থানে যণ্ স্যাদচি সংহিতায়াং বিষয়ে। 'সুধী উপাস্যঃ' ইতি স্থিতে। স্থানত আন্তর্যাদীকারস্য যকারঃ। 'সুধ্ য্ উপাস্যঃ' ইতি জাতে।

বঙ্গার্থ ঃ ষড়্‌বিধ সূত্রের মধ্যে ইহা বিধিসূত্র। এস্থলে 'সংহিতায়াম্' (৬/১/৭২) সূত্রের অধিকার রহিয়াছে। সুতরাং সূত্রার্থ হইল—(অচি) অচ্ (= অ ই উ ঋ ৯ এ ও ঐ ঔ)-এর অব্যবহিত পূর্ববর্তী ইক্ (=ই উ ঋ ৯) বর্ণের স্থানে যণ্ (= য্ ব্ র্ ল্) বর্ণ আদেশ হয়, সংহিতার বিষয় হইলে।

ইক্ + অচ্<br>
|<br>
যণ্

অর্থাৎ—

সংহিতৈকপদে নিত্যা নিত্যা ধাতূপসর্গয়োঃ।<br>
নিত্যা সমাসে বাক্যে তু সা বিবক্ষামপেক্ষতে।।

এক পদে তথা অখণ্ড পদে, ধাতু ও উপসর্গ যোগে এবং সমাসে সংহিতা (সন্ধি) নিত্য হয়, কিন্তু বাক্যে সন্ধি বক্তার ইচ্ছাধীন। 'সংহিতা'-বিষয়ে এইরূপ বলিবার কারণ হইল যে, ব্যবধান রহিত স্বরবর্ণ পরে থাকিলেই পূর্ববর্তী ইক্ বর্ণের স্থানে যণ্ বর্ণ আদেশ হয়। সুতরাং 'সুধী + উপাস্যঃ' স্থলে স বর্ণের পর উ বর্ণের স্থানে তথা 'উপাস্যঃ' ইহার উ বর্ণের স্থানে ব্-কার আদেশ হয় না। কারণ